# Durva Yugalarpana Stotram

# દૂર્વાયુગલાર્પણસ્તોત્રમ્

## Document Information

Text title : Durva Yugalarpana Stotram

File name : dUrvAyugalArpaNastotram.itx

Category : ganesha, stotra

Location : doc_ganesha

Transliterated by : Yash Khasbage

Proofread by : Yash Khasbage

Description/comments : Ganesha Kosha, Amarendra Gadgil

Latest update : May 9, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 11, 2025

*sanskritdocuments.org*

# Durva Yugalarpana Stotram

# દૂર્વાયુગલાર્પણસ્તોત્રમ્

શ્રીમન્મઙ્ગલમઙ્ગલં ગણપતિં બ્રહ્મણ્યદેવં કવિં
જ્યેષ્ઠં શ્રેષ્ઠતમં વરેણ્યમમૃતં વિઘ્નેભપઞ્ચાનનમ્ ।
ત્વાં સર્વેપ્સિતદં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૧॥

બ્રહ્માનન્દરસામ્બુધિં ગુણનિધિં ધીઋદ્ધિસિદ્ધીશ્વરં
સિન્દૂરારુણવિગ્રહં ત્રિનયનં સદ્ભક્તહૃન્મોદકમ્ ।
ત્વાં ગૌરીશસુતં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૨॥

ઓઙ્કારાદિમબીજકારણમનિર્વાચ્યં જગત્કારણં
યોગીહૃત્કમલં પ્રબોધનકરં ભાનું ભવાપદ્ધરમ્ ।
ત્વાં ભાલેન્દુમહં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૩॥

ઉદ્યદ્ભાસ્કરકોટિભાપ્રતિમભં દિવ્યા ગદાલઙ્કૃતં
વિઘ્નેશં વિકટં વિશાલજઠરં મન્દારપુષ્પપ્રિયમ્ ।
ત્વાં ત્રૈલોક્યપતિં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૪॥

હસ્તૈર્યઃ સતતં વરાભયસૃણીપર્શૂન્વહન્તં મુદા
શૂર્પશ્રોત્રકમમ્બુજેક્ષણમઘૌઘધ્વાન્તવૈકર્તનમ્ ।
ત્વામામ્નાયનિધિં પ્રણમ્ય ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૫॥

શુણ્ડાગ્રે ધૃતમોદકં પ્રમુદિતં સન્મૂષિકેન ધ્વજં
નૂપૂરાદિકિરીટકુણ્ડલધરં દેવં મહાતુન્દિલમ્ ।
ત્વાં સઙ્કષ્ટહરં પ્રણમ્ય  મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૬॥

દાનદ્રાવિલગણ્ડમણ્ડલયુગં મોદાહૃભ્રામરં
ભક્તારિષ્ટચિનષ્ટિવિગ્રહધરં શ્રીવક્રતુણ્ડં મુહુઃ ।
ત્વાં વાગીશમહં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૭॥

આશાપૂરકમદ્રિરાજતનયાસત્કુક્ષિશુક્ત્યુદ્ભવં
ઢુણ્ઢિં ક્ષિપ્રવરપ્રદાનસુમુખં ચિન્તામણિં સિદ્ધિદમ્ ।
ત્વાં વિદ્યામ્બુનિધિં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૮॥

ભૂતાનાં પ્રભાવાપ્યયાવનગુણાનામાદિબીજં પરં
ભાત્યસ્તિપ્રિયનામરૂપગણપં નૈર્ગુણ્યસૌખ્યાસ્પદમ્ ।
ત્વાં સર્વાર્તિહરં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૯॥

હેરમ્બં ભવઘોરમૂલવિપિનં ધ્વાન્તાર્તિવિચ્છેદકં
સદ્યસ્તાપહરં સુધાકરમનન્તાનન્તલીલાસ્પદમ્ ।
ત્વાં સર્વજ્ઞમહં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૧૦॥

ઈડ્યં શ્રેષ્ઠતમં ગુરું ગુરુતમં શ્રીજ્યેષ્ઠરાજં કવિં
પૂર્ણાનન્દસુધાપયોનિધિશયં ધીપ્રેરકં દ્યોતકમ્ ।
ત્વાં પ્રજ્ઞાનઘનં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૧૧॥

ધ્યેયં બ્રહ્મસનાતનં યદુદિતં ગાણેશવિદ્યાચણૈઃ
વેદજ્ઞૈઃ સુવિવિચ્ય તત્વમસિ વાક્યાર્થસ્ય સન્દર્શકૈઃ ।
તત્તત્વં ત્વમિતિ પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૧૨॥

યઃ કાશિગૃહેઽવતીર્ય શિશુભિઃ લીલાં જગત્પાવનીં
કૃત્વા દેવનરાન્તકાદિ દિતિજાન્ હત્વાહરદ્ભૂભરમ્ ।
ત્વાં બલ્લાળમહં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૧૩॥

આહુર્યં મુનયોઽનુવિપ્રતમમિત્યાદ્યં કવીનાં કવિં

કાર્યં પ્રાકૃતિકં વિચિત્રમખિલં નો ભાસતે યદૃતે ।
તં ત્વામેકરદં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૧૪॥

સંહૃત્યાત્મનિ યઃ પ્રસુપ્તિસમયે વિશ્વં સમગ્રં ત્વિદં
શેતે સ્વાત્મસુખાર્ણવે સુવિતતે શેષાખ્યતલ્પે શુભે ।
ત્વાં સ્વાત્માભિરમં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૧૫॥

ધ્યાત્વા ત્વાં હૃદયે મયા પરિચિતા નો માન્ત્રિકી તાન્ત્રિકી
દીક્ષાદીક્ષિતશિક્ષિતાકથમહં સ્યાં ત્વત્કૃપાભાજનમ્ ।
ત્વાં ચિત્તાર્ત્તિહરં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૧૬॥

ભક્તાસ્ત્વાં કરુણં ત્વમેવમિતિ યત્ નિત્યં બ્રુવન્તિ સ્ફુટં
તદ્દીને મયિ ચાતકેઽલ્પમતિકે તૂર્ણં કૃપાં વર્ષય ।
ત્વાં ભૂતીશમહં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૧૭॥

ષટ્પઞ્ચાશતધાષ્ટધા ચ દશધા ભૂત્વા પુનઃ પઞ્ચધા
કાશ્યાં ષોડશધા ચ યો નિવસતિ શ્રીવિશ્વનાથપ્રિયઃ ।
ત્વાં લીલાત્તતનું પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૧૮॥

દૂર્વાલઙ્કરણં તયા પ્રતિદિનં દૂર્વાવનાન્તશ્ચરં
દૂર્વાતલ્પશયં શિરસ્યપિ તથા દૂર્વાકિરીટોદ્વહમ્ ।
ત્વાદૂર્વાત્તહૃદં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યૈ તત્ત્વમઙ્ગીકુરુ ॥ ૧૯॥

દૂર્વે ત્વાં પ્રણમામ્યહં મયિ કૃપાંસ્ કુર્વાશુ માતર્વિભું
મદ્વિજ્ઞપ્ત્યુરરીકૃતૌ નિજપતિ સ્વાપેક્ષયા પ્રાર્થય ।
તેઽતિપ્રીતિકરસ્તવૈવ વચસા ગન્ધાક્ષતૈર્સંયુતં
દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યઃ સ્વીકરોત્યદ્ભુતમ્ ॥ ૨૦॥

(યા પ્રીતિર્મમજાયતેઽતિવિમલા દૂર્વાઙ્કુરૈરર્ચકે
સા નૈકાક્ષરવિદ્યયા ચ યજતો ચાન્યૈઃ કુતઃ સાધનૈઃ ।
શ્રુત્વૈતદ્વચનં પ્રણમ્ય મનસા ગન્ધાક્ષતૈઃ સંયુતં

દૂર્વાયુગ્મમિદં મયાર્પિતમિભાસ્યઃ સ્વીકરોત્યદ્ભુતમ્ ॥ ૨૧॥

યે દૂર્વાયુગલાર્પણસ્તુતિમિમાં શ્રીમદ્ગણેશપ્રિયાં
ધ્યાત્વા સ્વાત્મનિ મઙ્ગલાલયમમું ભક્ત્યા પઠન્તિ પ્રગે ।
તે વૈ વૈશ્રવણોપમાસ્ત્રિભુવને ભક્ત્યા તુ સૌખ્યં મહત્
ગાણેશં પદમાપ્નુવન્તિ ન પુનઃ પશ્યન્તિ ગર્ભાલયમ્ ॥ ૨૨॥)

ઇતિ બૃહદ્વિષ્ણુયામલે દૂર્વાયુગલાર્પણસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Yash Khasbage

---

*Durva Yugalarpana Stotram*

pdf was typeset on May 11, 2025

Please send corrections to *sanskrit@cheerful.com*